# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ तृतीयः सर्गः ॥(मुग्धमधुसूदनः)

**(अनुष्टुप)**

**कं(म्)सारिरपि सं(म्)सार-वासनाबन्धशृङ्खलाम् ।**

**राधामाधाय हृदये, तत्याज व्रजसुन्दरीः ॥ 1॥**

**(जगती)**

**इतस्ततस्तामनुसृत्य राधिका-**

**मनङ्गबाणव्रणखिन्नमानसः ।**

**कृतानुतापः(स्) स कलिन्दनन्दिनी-**

**तटान्तकुञ्जे निषसाद माधवः ॥ 2॥**

### ॥ गीतम् 7॥

**(अथ सप्तमप्रबन्धः गुर्जरीरागेण प्रतिमण्ठताले गीयते)**

**मामियं(ञ्) चलिता विलोक्य वृतं(वँ) वधूनिचयेन ।**

**सापराधतया मयापि न वारितातिभयेन ।**

**हरिहरि हतादरतया सा गता कुपितेव ॥ 1॥**

किं(ङ्) करिष्यति किं(वँ) वदिष्यति सा चिरं(वँ) विरहेण ।
किं(न्) धनेन जनेन किं(म्) मम जीवनेन गृहेण ॥ 2॥ हरिहरि

चिन्तयामि तदाननं(ङ्) कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरिभ्रमताकुलं(म्) भ्रमरेण ॥ 3॥ हरिहरि

तामहं(म्) हृदि सं(ङ्)गतामनिशं(म्) भृशं(म्) रमयामि ।
किं(वँ) वनेऽनुसरामि तामिह किं(वँ) वृथा विलपामि ॥ 4॥ हरिहरि

तन्वि खिन्नमसूयया हृदयं(न्) तवाकलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥ 5॥ हरिहरि

दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं(म्) पुरेव ससम्भ्रमं(म्) परिरम्भणं(न्) न ददासि ॥ 6॥ हरिहरि

क्षम्यतामपरं(ङ्) कदापि तवेदृशं(न्) न करोमि ।
देहि सुन्दरि दर्शनं(म्) मम मन्मथेन दुनोमि ॥ 7॥ हरिहरि

वर्णितं(ञ्) जयदेवकेन हरेरिदं(म्) प्रवणेन ।
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥ 8॥ हरिहरि

इति श्रीगीतगोविन्दे सप्तमः प्रबन्धः ॥

### (वसंततिलकावृत्तम्)

भ्रूपल्लवं(न्) धनुरपाङ्गतरङ्गितानि
बाणा गुणः(श्) श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवतायां(म्)
अस्त्राणि निर्जितजगन्ति किमर्पितानि ॥ 1॥

### (हरिणी)

हृदि बिसलताहारो नायं(म्) भुजङ्गमनायकः(ख्)
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं(म्) भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥ 2॥

### (शार्दूलविक्रीडितेन)

पाणौ मा कुरु चूतसायकममुं(म्) मा चापमारोपय
क्रीडानिर्जितविश्वमूर्छितजनाघातेन किं(म्) पौरुषम् ।
तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षाशुग-
श्रेणीजर्जरितं(म्) मनागपि मनो नाद्यापि सं(न्)धुक्षते ॥ 3॥

### (शार्दूलविक्रीडितेन)

भ्रूचापे निहितः(ख्) कटाक्षविशिखो निर्मातु मर्मव्यथां(म्)
श्यामात्मा कुटिलः(ख्) करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं(ञ्) च तन्वि तनुतां(म्) बिम्बाधरो रागवान्

सद्वृत्तस्तनमण्डलं(न्) तव कथं(म्) प्राणैर्मम क्रीडति ॥ 4॥

(शार्दूलविक्रीडितेन)

तानि स्पर्शसुखानि ते च तरलाः(स्) स्निग्धा दृशोविभ्रमास्-
तद्वक्त्राम्बुजसौरभं(म्) स च सुधास्यन्दी गिरां(वँ)वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं(न्)
तस्यां(लँ) लग्नसमाधि हन्त विरहव्याधिः(ख्) कथं(वँ) वर्धते ॥ 5॥

(शार्दूलविक्रीडितेन)

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चलद्-
दीप्तिस्थानकृतावधानललनालक्षैर्न सं(लँ)लक्षिताः ।
सम्मुग्ध्दे मधुसूदनस्य मधुरे राधामुखेन्दौ सुधा-
सारेकन्दलिताश्चिरं(न्) दधतु वः क्षेमं(ङ्) कटाक्षोर्मयः ॥ 6 ॥

॥ इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥

